## सपूर्वाच्च । (८७/१८८७)

[1]विद्यमानं पूर्वं यस्मादिति सपूर्वं प्रातिपदिकम्, तस्य पूर्वशब्देन तदन्तविधिः । सपूर्वात् प्रातिपदिकात् पूर्वशब्दान्तात् अनेन इत्यस्मिन्नर्थे इनिः प्रत्ययो भवति । पूर्वं कृतमनेन[2] कृतपूर्वी कटम् । भुक्तपूर्वी ओदनम् । सुप् सुपा (२. १. ४/६४९) इति समासं कृत्वा तद्धित [3]उत्पाद्यते । [4]योगद्वयेन चानेन 'पूर्वादिनिः' (५. २. ८६/१८८६), 'सपूर्वाच्च' (५. २. ८७/१८८७) इति परिभाषाद्वयं [5]ज्ञाप्यते, 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' (शा. प. ६५), 'ग्रहणवता प्रातिपदिकेन तदन्तविधि[6]र्नास्ति' (व्या. प. ८९) इति ॥

## इष्टादिभ्यश्च । (८८/१८८८)

[7]अनेन इत्येव । [8]इष्टादिभ्यः प्रातिपदिकेभ्यः अनेन इत्यस्मिन्नर्थे इनिः प्रत्ययो भवति । इष्टमनेन इष्टी यज्ञे । पूर्ती श्राद्धे । 'क्तस्येन्विषयस्य कर्मणि' (वा. १३३) इति सप्तम्युपसङ्ख्यायते ।

इष्ट । पूर्त । [9]उपसादित । निगदित । [10]परिवादित । निकथित । [11]परिकथित । [12]सङ्कलित । निपठित । सङ्कल्पित । अर्नाचित । विकलित । संरक्षित । निपतित । पठित । परिकलित । अर्चित[13] । परिरक्षित । पूजित । परिगणित । उपगणित । अवकीर्ण । परित । आयुक्त[14] । आम्नात । श्रुत । अधीत । आसेवित । [15]अपवारित । अवकल्पित । निराकृत । उपकृत । उपाकृत । अनुयुक्त । उपनत । [16]अनुगुणित । [17]अनुपठित । व्याकुलित । निगृहीत । इष्टादिः ॥

## छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि । (८९/१८८९)

परिपन्थिन् परिपरिन् इत्येतौ [18]शब्दौ छन्दसि विषये निपात्येते, पर्यवस्थातरि वाच्ये । पर्यवस्थाता प्रतिपक्षः, [19]सपत्न उच्यते । 'मा त्वा परिपन्थिनो विदन् मा त्वा परिपरिणो विदन्' (वा. सं. ४. ३४) ॥

## अनुपद्यन्वेष्टा । (९०/१८९०)

अनुपदी इति निपात्यते अन्वेष्टा चेत् [20]स भवति । पदस्य [21]पश्चादनुपदम् । अनुपदी गवाम् । अनुपदी उष्ट्राणाम् ॥

## साक्षाद् द्रष्टरि सञ्ज्ञायाम् । (९१/१८९१)

साक्षाच्छब्दोऽव्ययम् । तस्मादिनिः प्रत्ययो भवति द्रष्टरि वाच्ये । सञ्ज्ञाग्रहणमभिधेयनियमार्थम् । साक्षाद् द्रष्टा साक्षी । साक्षिणौ । साक्षिणः । सञ्ज्ञाग्रहणाद् [22]उपद्रष्टा एव उच्यते, न दाता [23]ग्रहीता वा ॥

---

1. अनेन इत्येव इत्यधिकम् ड. 2. इति इत्यधिकम् क. 3. क्रियते क. 4. योगविभागेन फ. 5. ज्ञायते क. 6. न भवति ब. क. फ. 7. अनेन इत्येव नास्ति क. 8. इष्ट इत्येवमादिभ्यः फ. 9. उपासादित क, उपसाहित फ. 10. परिवादित नास्ति क. 11. परिकलित क. 12. सङ्कुचित ह. 13. गणित इत्यधिकम् क, गुणित इत्यधिकम् ह. 14. गृहीत इत्यधिकम् ह. 15. अवधारित क. फ. 16. अनुगणित क. 17. परिविहित फ. 18. शब्दौ नास्ति फ. 19. सम्पन्नः बा. शा, सम्पन्नप्रतिपक्षः प्रा. भा. 20. स नास्ति फ. 21. पश्चात् नास्ति ब. क. ड. ह. 22. अनुद्रष्टा क. ह. 23. निग्रहीता फ, प्रतिग्रहीता ह.